# श्री भद्रकाळयष्टकं

### श्री भद्रकाळयष्टकं

घोरे संसारवह्नौ प्रळयमुपगते या हि कृत्वा श्मशाने
नृत्यत्यन्यूनशक्तिर्जगदिदमखिलं मुंडमालाभिरामा |
भिद्यद्ब्रह्मांडभांडं पटुतरनिनदैरट्टहासैरुदारैः
सास्माकं वैरिवर्गं शमयतु तरसा भद्रदा भद्रकाळी || 1 ||

मग्ने लोकेऽंबुराशौ नलिनभवनुता विष्णुना कारयित्वा
चक्रोत्कृत्तोरुकंठं मधुमपि भयदं कैटभं चातिभीमं |
पद्मोत्पत्तेः प्रभूतं भयमुत रिपुतोयाहरत्सानुकंपा
सास्माकं वैरिवर्गं शमयतु तरसा भद्रदा भद्रकाळी || 2 ||

विश्वत्राणं विधातुं महिषमथ राणे याऽसुरं भीमरूपं
शूलेनाहत्य वक्षस्यमरपतिनुता पातयंती च भूमौ |
तस्यासृग्वाहिनीभिर्जलनिधिमखिलं शोणिताभं च चक्रे
सास्माकं वैरिवर्गं शमयतु तरसा भद्रदा भद्रकाळी || 3 ||

या देवी चंडमुंडौ त्रिभुवननळिनीवारणौ देवशत्रू
दृष्ट्वा युद्धोत्सवे तौ द्रुततरमभियातासिना कृत्तकंठौ |
कृत्वा तद्रक्तपानोद्भवमदमुदिता साट्टहासातिभीमा
सास्माकं वैरिवर्गं शमयतु तरसा भद्रदा भद्रकाळी || 4 ||

सद्यस्तं रक्तबीजं समरभुवि नता घोररूपानसंख्यान्
राक्तोद्भूतैरसंख्यैर्गजतुरगरथैः सार्थमन्यांश्च दैत्यान् |
वक्त्रे निक्षिप्य दृष्ट्वा गुरुतरदशनैरापपौ शोणितौघं
सास्माकं वैरिवर्गं शमयतु तरसा भद्रदा भद्रकाळी || 5 ||

स्थानाद्भ्रष्टैश्च देवैस्तुहिनगिरितटे संगतैः संस्तुता या
संख्याहीनैः समेतं त्रिदशरिपुगणैः स्यंदनेभाश्वयुक्तैः |
युद्धे शुंभं निशुंभं त्रिभुवनविपदं नाशयंती च जघ्ने
सास्माकं वैरिवर्गं शमयतु तरसा भद्रदा भद्रकाळी || 6 ||

शंभोर्नेत्रानले या जननमपि जगत्त्राणहेतोरयासीत्
भूयस्तीक्ष्णातिधाराविदलितदनुजा दारुकं चापि हत्वा |
तस्यासृक्पानतुष्टा मुहुरपि कृतवत्यट्टहासं कठोरं
सास्माकं वैरिवर्गं शमयतु तरसा भद्रदा भद्रकाळी || 7 ||

या देवी कालरात्री तुहिनगिरसुता लोकमाता धरित्री
वाणी निद्रा च माया मनसिजदयिता घोररूपातिसौम्या |
चामुंडा खड्गहस्ता रिपुहननपरा शोणितास्वादकामा
सा हन्याद्विश्ववंद्या मम रिपुनिवहा भद्रदा भद्रकाळी || 8 ||

भद्रकाळ्यष्टकं जप्यं शत्रुसंक्षयकांक्षिणा |
स्वर्गापवर्गदं पुण्यं दुष्टग्रहनिवारणं || 9 ||

इति श्रीभद्रकाळ्यष्टकं |